दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-159 | 1 | अप्रैल 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लचतुर्दशी
चैत्र 18 प्रविष्ठांशः मङ्गलमयः भवेत्

2 पञ्चायत-निर्वाचनस्य आरक्षण-सूची-नियमेषु संशोधनम्; सर्वकारेण अधिसूचना प्रसारिता

3 भारत-तिब्बत सीमा पुलिस (ITBP) स्थानीयकृषकेभ्यः साक्षात् क्रयणं करिष्यति

5 वृक्षाणां जीवितम् अस्ति इति प्रथमं वैज्ञानिकः डॉ. जगदीशचन्द्रबसुः सिद्धवान्। वृक्षाः श्वासं गृह्णन्ति, श्वासं मुञ्चन्ति च- एतत् सर्वे जानन्ति; ...

## ईरान-देशस्य ड्रोन-आक्रमणेन दुबई-तटस्य समीपे एकः विशालः तैलेन पूरितः जलयानः आक्रान्तः

इरान-देशस्य ड्रोन-आक्रमणेन दुबई-तटस्य समीपे एकः विशालः तैलेन पूरितः जलयानः आक्रान्तः, येन वैश्विक ऊर्जा-आपूर्तिषु व्यापक-संघर्षस्य, व्यवधानस्य च आशङ्का जाता। आक्रमणानन्तरं, द्विलक्ष बैरल परिमितं यावत् अशोधित-तैलं वहतः कुवैत-देशस्य ध्वजयुक्तः अल-सलमी-जलयाने अग्निप्रकोपः अभवत्। दुबई-नगरस्य अधिकारिणः उक्तवन्तः यत्, अग्निः नियन्त्रिता, सर्वे चतुर्विंशति कर्मचारिणः सुरक्षिताः सन्ति। नौकायाः स्वामी कुवैत पेट्रोलियम-कार्पोरेशन् इत्ययम् आगृहीत् यत् क्षतिना अधुनापि तैलस्य स्रावः भवितुं शक्नोति। अस्मिन् वर्षस्य आरम्भे अमेरिका-इस्राएल-देशयोः इरान-देशस्य उपरि आक्रमणस्य अनन्तरं वर्धमानस्य तनावस्य मध्ये एषा घटना अभवत्।

## पूर्वटेनिसक्रीडकः लीण्डर पेस नवदेहल्यां दलस्य वरिष्ठनेतृणां उपस्थितौ भारतीयजनता-पार्टीति दले सम्मिलितः



पूर्वटेनिसक्रीडकः लीण्डर पेस नवदेहल्यां दलस्य मुख्यालये केन्द्रीयमन्त्रिणः किरेन रिजिजुम् सुखंता मजुमदारम् समेत्य दलस्य वरिष्ठनेतृणां उपस्थितौ भारतीयजनतापार्टीति दले सम्मिलितः। पेस इत्यस्य दलस्य स्वागतं कुर्वन् रिजिजुमहोदयः भाजपादले तस्य प्रवेशं ऐतिहासिकं वर्णितवान्। पेस महोदयः प्रधानमन्त्रिनः मोदिनः, गृहमन्त्री अमितशाहस्य दलस्य अध्यक्षस्य नितिन नवीनस्य च कृते धन्यवादं प्रदाय उक्तवान् यत् तस्य जीवनस्य महत् दिनमस्ति । खेलो-भारत-आन्दोलनस्य, टोप्स्-योजनायाः च प्रशंसाम् कुर्वन् पेस् अवदत् यत् एषः क्रीडायाः यूनां च सेवितुम् महान् अवसरः अस्ति ।

# प्रधानमन्त्रिणा नरेन्द्रमोदिना अहमदाबादस्य साणन्द ओ.एस.ए.टी. इत्यत्र केयन्स-अर्धचालक-संयंत्रस्य उद्‌घाटनं कृतम्




प्रधानमन्त्रिणा नरेन्द्रमोदिना अहमदाबादस्य साणन्द ओ.एस.ए.टी. इत्यत्र केयन्स अर्धचालक-संयंत्रस्य उद्घाटनं कृतम् । एतेन सहैव संयंत्रे वाणिज्यिक उत्पादनस्य शुभारम्भः भविष्यति। अस्मिन् अवसरे प्रधानमन्त्री जनसमूहं सम्बोधितवान् । एतत् संयंत्रम् उन्नत-बुद्धिमत्-शक्ति-मॉड्यूल् (आई.पी.एम.) इति निर्मितं भविष्यति । एषः भारतस्य अर्धचालकक्षेत्रे महत्त्वपूर्णः विकासक्रमो विद्यते। प्रत्येकं मॉड्यूल इत्यत्र सप्तदश चिप्स् इत्येतानि सन्ति अपि च, तेषां आपूर्तिः कैलिर्नियायां-अल एण्ड ओमेगा सेमीकण्डक्टर्स इत्यत्र कारयिष्यते

### प्रधानमन्त्री मोदी गुजरातयात्रायां महावीरजयन्त्यवसरे कोबानगरे सम्राट्-सम्प्रति-संग्रहालयस्य उद्घाटनं कृतवान्।

प्रधानमन्त्री मोदी गुजरातयात्रायां महावीरजयन्त्यवसरे कोबानगरे सम्राट्-सम्प्रति-संग्रहालयस्य उद्घाटनं कृतवान् । अयं संग्रहालयः जैन-इतिहासस्य सम्राट्-सम्प्रति-जीवनस्य, तस्य शासनस्य, अहिंसा-सन्देशस्य च कृते समर्पितः अस्ति । अस्मिन् अवसरे जनसभां सम्बोधयता प्रधानमन्त्रिणा उक्तं यत् कोबा-तीर्थ मूल्यानां संरक्षणं करोति, सांस्कृतिक आचारम् -संस्कारं सशक्तं करोति, ज्ञानं च प्रवर्धयति तेन त्रयाणां वर्णानां धाराणां संगमः उक्तः अध्ययनं, आध्यात्मिकः अभ्यासः, आत्मानुशासनं च । श्रीमोदी अवदत् यत् एषः भारतीयसभ्यतायाः आधारः अस्ति। अस्य पवित्रस्य संगमस्य प्रवाहं निर्वाहयितुम् अस्माकं सामूहिकं कर्तव्यम् अस्ति इति प्रधानमन्त्रिणा बोधितम्।

## कोलकाता-उच्चन्यायालयेन अनेकेषां आई.ए.एस्. तथा आई.पी.एस्. अधिकारिणां, अपि च विभिन्नानां अधिकारिणां च स्थानान्तरणस्य विरोधं कुर्वत्यः याचिकाः निराकृताः



कोलकाता-उच्चन्यायालयेन अनेकेषां आई.ए.एस. तथा आई.पी.एस. अधिकारिणां, अपि च विभिन्नेषु प्रभारी-निरीक्षकानां, प्रभारी-अधिकारिणां, खण्ड-विकास-अधिकारिणां च स्थानान्तरणस्य विरोधं कुर्वत्यः याचिकाः निराकृताः। मुख्यन्यायाधीशस्य सुजॉय पॉलस्य, न्यायमूर्तेः पार्थसारथी सेनस्य च खण्डपीठेन निर्वाचनायोगस्य स्थानान्तरण-निर्णयस्य विरुद्धं अधिवक्तुः आर्का नाग इत्यस्याः याचिकायाः प्रतिक्रियारूपेण आदेशः प्रसारितः। स्वस्य आदेशे न्यायालयेन उक्तं यत् सर्वकारीयसेवायां स्थानान्तरणं मानकप्रक्रिया अस्ति तथा च कस्यापि पीडितस्य अधिकारिणः समीपे व्यक्तिगतरूपेण याचिकायै विधि-माध्यमः अस्ति। न्यायपीठेन इतोऽपि उक्तं यत् एतेषां स्थानान्तरणैः सार्वजनिक हितानां हानिं कथं जातम् ? अथवा राज्यप्रशासनस्य कल्याणकार्याणि च कथं विच्छिन्नानि जातानि ? इति प्रदर्शयितुं सर्वकारः असलः अभवत्।

**महावीर जयंती**- चतुर्विंशति-तमस्य तथा अन्तिमस्य जैनतीर्थङ्करस्य भगवतः महावीरस्य जन्मजयन्ती महावीरजयन्ती सम्पूर्ण देशे महतोत्साहेन आचरिता । महावीरजयन्ती जैनसमुदायस्य कृते अत्यन्तं शुभदिनेषु अन्यतमः इति मन्यते, तेषां धार्मिकजीवने च बहु महत्त्वं धारयति। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च महावीरजयन्ति अवसरे देशवासिनां कृते शुभाशयाः प्रेषितवन्तः ।

## सुभाषितम्

**इन्द्रियं विजितं येन,**
**तेनैव भुवनं जितम्।**
**यश्चेन्द्रियैः पराभूतः,**
**स सर्वत्र पराजितः।।**

भावार्थः- जिस व्यक्ति ने अपनी इन्द्रियों पर विजय प्राप्त कर ली उसने सारे संसार पर विजय प्राप्त कर ली है और यदि कोई व्यक्ति अपनी इन्द्रियों से पराजित हो जाता है तो वह जीवन के हर क्षेत्र में पराजित हो जाता है।




## रक्षामन्त्रालयेन सार्धनवशताधिक एकसहस्र कोटिरूप्यकाणाम नुबन्धं हस्ताक्षरितम्

रक्षामन्त्रालयेन सार्धनवशताधिक-एकसहस्र कोटिरूप्यकाणां अनुबन्धे हस्ताक्षरः कृतः। भारतीयवायुसेनायाः कृते माऊन्टन रडार द्वयस्य क्रयणम् कर्तुं नवदेहल्यां भारत-इलेक्ट्रॉनिक्स लिमिटेड् (बीइएल) इत्यनेन व्यापारः कृतः। मन्त्रालयेन उक्तं यत् (स्वदेशीयरूपेण प्रारूपनिर्माणं विकसितं निर्मितं च) इत्थं हस्ताक्षरितः व्यापारः सर्वकारस्य आत्मनिर्भरभारतस्य, मेक इन इण्डिया इत्यस्य च उपक्रमैः सह सङ्गच्छते।

# पञ्चायत-निर्वाचनस्य आरक्षण-सूची-नियमेषु संशोधनम्; सर्वकारेण अधिसूचना प्रसारिता




**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशसर्वकारेण 'हिमाचलप्रदेश पञ्चायतीराज (निर्वाचन) नियम-१९९४' इत्यस्मिन् संशोधनाय नूतनाः नियमाः निर्धारिताः। 'हिमाचलप्रदेश पञ्चायतीराज (निर्वाचनम्) संशोधन-नियम- २०२६' इत्यस्य अन्तर्गतम् अधुना ९५ प्रतिशतं पञ्चायतानां आरक्षणं सामान्यनियमानुसारं भविष्यति, किन्तु ५ प्रतिशतं पञ्चायतेषु जनपदाधिकारिणः (DC) भौगोलिक- विशिष्ट-परिस्थितीनाम् आधारेण आरक्षणसूचीमध्ये परिवर्तनं कर्तुं शक्ष्यन्ति। सम्प्रति पञ्चायतेषु नगरादिनिकायेषु च प्रशासकाः (Administrators) नियुक्ताः सन्ति, यतः निर्वाचनं समये न अभवत्।

### नगरनिगमेषु (सोलन, मण्डी, पालमपुरम्) २०११ जनगणनाधारेण आरक्षणम्

सोलन, मण्डी, पालमपुरम् इति नगरनिगमेषु महापौराणाम् (Mayor) उप-महापौराणां च पदानाम् आरक्षणं २०११ तमे वर्षे जाति-जनगणनायाः आधारेण कृतम्। त्रिषु अपि निगमेषु अनुसूचित-जनजातेः (ST) जनसङ्ख्या न्यूना अस्ति। जनसङ्ख्यायाः अनुपातं दृष्ट्वा 'महापौर-पदम्' अनारक्षितं (सामान्यवर्गः) स्थापितम्। पूर्वं एतत् पदं 'एसटी' वर्गाय आरक्षितं भविष्यति इति सम्भावना आसीत्, किन्तु अन्तिम-अङ्कैः स्थितिः स्पष्टा अभवत्।

### महिलाभ्यः ५० प्रतिशतम् आरक्षणम्; ओबीसी- वर्गस्य स्थितिः

पञ्चायतीराजविभागेन नियम-२८, ८७, ८८, ८९ इत्येषु नूतनप्रबन्धाः योजिताः, येन निर्वाचनप्रक्रिया पारदर्शिनी भवेत्। ग्रामपञ्चायत- समिति- जिलापरिषत्सु आहत्य ५० प्रतिशतं पदानि महिलाभ्यः आरक्षितानि भविष्यन्ति।

आरक्षणसूचीमध्ये प्रथमम् अनुसूचित-जातिः (SC) तदनन्तरं अनुसूचित-जनजातिः (ST) च प्राथमिकतां प्राप्स्यतः। यदि कस्यचित् वर्गस्य जनसङ्ख्या ५ प्रतिशततः न्यूना अस्ति, तर्हि तत्र आरक्षणं न भविष्यति।

**ओबीसी-आरक्षणम्-**

अन्य-पृष्ठ-वर्गाय (OBC) जनसङ्ख्यानुपातेन अधिकतमं १५ प्रतिशतं आरक्षणं दास्यते।

### उच्चन्यायालयस्य (High Court) आदेशः ७ अप्रैल पर्यन्तं रोस्टर-प्रसारणम्

हिमाचल-उच्चन्यायालयः राज्यसर्वकारं निर्देशितवान् यत् ७ अप्रैल २०२६ दिनाङ्कपर्यन्तं पञ्चायत-निर्वाचनस्य आरक्षणसूचीः अनिवार्यरूपेण प्रसारयन्तु। न्यायालयेन स्पष्टीकृतं यत् रोस्टरनिर्माणं १३ फरवरी २०२६ दिनाङ्कस्य स्थितिं दृष्ट्वा एव करणीयम्।

१३ फरवरी अनन्तरं निर्मितानां नूतन-पञ्चायतानां अथवा पुनर्सङ्घटन-प्रक्रियाणाम् उपरि सम्प्रति स्थगनं (Stay) भविष्यति।

# नालन्दायाः पुनरुत्थानम् केवलं बिहारस्य भारतस्य वा उपलब्धिः एव नास्ति, अपितु सम्पूर्णस्य विश्वस्य बौद्धिक-सांस्कृतिक-पुनर्जागरणस्य आरम्भः अपि अस्ति - राष्ट्रपतिद्रौपदी मुर्मूः




राष्ट्रपतिद्रौपदी मुर्मुः उक्तवती यत् नालन्दायाः पुनरुत्थानम् केवलं बिहारस्य भारतस्य वा उपलब्धिः एव नास्ति, अपितु सम्पूर्णस्य विश्वस्य बौद्धिक-सांस्कृतिक-पुनर्जागरणस्य आरम्भः अपि अस्ति। राष्ट्रपतिः नालन्दाविश्वविद्यालयस्य द्वितीयं दीक्षान्तसमारोहं सम्बोधयन्ती आसीत्। राष्ट्रपति मुर्मुः उक्तवती यत् सप्त चत्वारिंशदुत्तर-द्विसहस्र-ईस्वीय-तमवर्ष-पर्यन्तं 'विकसितभारतस्य' लक्ष्यं प्राप्तुं नालंदाविश्वविद्यालयस्य प्रमुखा भूमिका भविष्यति।

# विश्वस्य बृहत्तमा जनगणना द्वयोः चरणयोः सञ्चालिता भविष्यति




विश्वस्य बृहत्तमा जनगणना द्वयोः चरणयोः सञ्चालिता भविष्यति, प्रथमस्य चरणस्य आरम्भः अद्य भविष्यति। प्रथमवारं डिजिटली-रूपेण जनगणनायाः सञ्चालनं भविष्यति, स्वगणनायाः विकल्पोपि उपलभ्यते। भारतस्य महापंजीयकः जनगणना-आयुक्तः च मृत्युंजयकुमार-नारायण उक्तवान् तत् पूर्व-जनगणनायाः अपेक्षया सप्तविंशत्यधिक द्विसहस्रतम वर्षस्य जनगणना कथं भिन्नः अस्ति इति उक्तवान्। विदेशेषु निवसन्तः भारतीयाः जनगणनायां कथं भागं ग्रहीतुं शक्नुवन्ति इत्यपि सः स्पष्टीकृतवान्।

# बिहारप्रदेशे शीतलाष्टमी-मन्दिरे धार्मिकानुष्ठान समये जनानुधावनस्य कारणात् अष्टौ महिलाभक्ताः मृताः, अन्याः च आहताः



बिहारप्रदेशे नालन्दाजनपदस्य बिहारशरीफ़े मघड़ा शीतलाष्टमी-मन्दिरे धार्मिकानुष्ठान समये जनानुधावनस्य कारणात् अष्टौ महिलाभक्ताः मृताः, अन्याः च काश्चन अनेकाः आहताः। आहताः स्थानीयचिकित्सालयेषु प्रवेशिताः। प्रत्यक्षदर्शिनामनुसारेण एकस्याः मिथ्याजनश्रुतेः कारणात् जनसमूहे इतस्ततः अनुधावनं प्रारब्धम्। उद्धारकार्यं प्रचलति। प्राप्तवार्तानुसारं मृतानां संख्या वर्धनस्य संभावना विद्यते।

# पोपस्य शान्तिप्रार्थनायाः दलाई लामा महोदयेन कृतं समर्थनम्; रूस- यूक्रेन- ईरान- युद्धेषु प्रकटिता गभीरा चिन्ता



**हिमसंस्कृतवार्ताः- धर्मशाला।** बौद्धधर्मगुरुः दलाई लामा महोदयः 'पोप लियो' महोदयेन 'पाम संडे मास' अवसरे वेटिकन-नगरात् विश्वशान्तये कृतायाः भावुक-आह्वानस्य पूर्णं समर्थनं कृतवान्। मङ्गलवासरे अत्र प्रसारिते आधिकारिक- सन्देशे दलाई लामा महोदयेन हिंसां त्यक्त्वा वार्तालाप-माध्यमेन सङ्घर्षाणां समाधानाय बलं दत्तम्।

**अहिंसायाः करुणायाः च मार्गः**

दलाई लामा महोदयेन पोप-महोदयस्य शान्ति-आह्वानं 'शक्तिशालि' इति उक्तम्। तेन घोषितं यत्- "शस्त्राणां त्यागः अहिंसायाः मार्गस्य च अनुकरणं मम हृदयं स्पृष्टवान्।" सः अवदत् यत् विश्वस्य सर्वे प्रमुखाः धर्माः- ख्रिस्त-बौद्ध-इस्लाम-हिन्दू-यिहूदी धर्माः वा भवन्तु सर्वेषां मूलसन्देशः प्रेम, करुणा, सहिष्णुता, आत्म-अनुशासनं च अस्ति। सः हिंसां शान्तेः स्थायी आधारं मन्तुं निराकृतवान्, उक्तवान् च यत् इतिहासः साक्षी अस्ति यत् हिंसा केवलं हिंसां जनयति।

### वैश्विक-सङ्कटं समाधानञ्च

दलाई लामा महोदयस्य एषः सन्देशः तादृशे समये आगतः यदा विश्वं भीषण-युद्धद्वयेन ग्रस्तं वर्तते। सुदीर्घकालेन जायमानेन अस्मिन् सैन्यसङ्घर्षेण वैश्विक- स्थिरता प्रभाविता अस्ति। २८ फरवरी दिनाङ्के अमेरिका-इजरायल देशाभ्यां ईरान-उपरि कृतेन आक्रमणेन स्थितिः अधिकं स्फोटकी (Explosive) जाता।

तेन विशेषतः उक्तं यत्- "युद्धस्य स्थायी समाधानं वार्तालापः (Dialogue), कूटनीतिः (Diplomacy), परस्पर-सम्मानः च भवेत्। वयं सर्वे भ्रातरः भगिन्यः च स्मः इति अस्माभिः अवगन्तव्यम्।" तेन मानवीय-आधारेण एतेषां सङ्घर्षाणां तत्क्षणमेव स्थगनाय प्रार्थना कृता।

"हिंसा न कदापि शान्तिं दातुं शक्नोति; केवलं करुणा एव विश्वं रक्षितुं समर्था।"

**-दलाई लामा, बौद्धधर्मगुरुः**

# भारत-तिब्बत सीमा पुलिस (ITBP) स्थानीयकृषकेभ्यः साक्षात् क्रयणं करिष्यति



**हिमसंस्कृतवार्ताः- शिमला** ।भारत-तिब्बत सीमा पुलिस (ITBP) हिमाचलप्रदेश- सर्वकारेण सह स्थानीयस्तरे उत्पादितानां सस्यानां, फलानां, दुग्धस्य, पनीरस्य, मांसस्य, 'ट्राउट' मत्स्यानां च क्रयणार्थं एकस्मिन् सहमतिपत्रे (MoU) हस्ताक्षरं कर्तुं सज्ज अस्ति। अस्याः व्यवस्थायाः अन्तर्गतं, आईटीबीपी संस्था साक्षात् कृषकेभ्यः, सहकारी-संस्थाभ्यः, स्थानीय- उत्पादकेभ्यः च वस्तूनि क्रेष्यति। अस्याः पहलस्य मुख्योद्देश्यं कृषकाणां कृते तेषां ग्रामेषु एव विश्वसनीयम् आपणम् उपलब्धं कारयितुम् अस्ति, येन तेषाम् आयवृद्धिः भविष्यति मध्यस्थानां च निर्भरता न्यूना भविष्यति।

## प्रमुखलाभाः प्रगतयः च-

- रोजगारस्य अवसराः- सीमावर्तिप्रदेशेषु निवसन्तां कृषकाणां, उद्यानिनां, ग्रामीणसमुदायानां च कृते नूतनाः रोजगारस्य अवसराः सृजिताः भविष्यन्ति।
- सततविकासः- इयं योजना क्षेत्रस्य समावेशी-टिकाऊ- विकासार्थं सहायिका भविष्यति।
- उच्चगुणवत्ता- आईटीबीपी संस्थायाः कृते निरन्तरं शुद्धानां गुणवत्तापूर्णानां च उत्पादानां आपूर्तिः सुनिश्चिता भविष्यति।
- आत्मनिर्भरता- सीमावर्तिक्षेत्रेषु आर्थिक-आत्मनिर्भरतायै बलं प्रदास्यति।

## मुख्यमन्त्रिणा सह मेलनम्

मुख्यमन्त्री ठाकुर सुखविन्दर सिंह सुक्खु महोदयः सोमवासरस्य सायं काले आईटीबीपी संस्थायाः वरिष्ठपदाधिकारिभिः सह, येषु उत्तर- सीमान्त- कमाण्डर आईजी मनु महाराज तथा सेक्टर- कमाण्डर डीआईजी पवन कुमार नेगी सम्मिलितौ आस्ताम्, एतस्य सहयोगस्य रूपरेखायाः विषये विस्तरेण चर्चां कृतवान्।

## मुख्यमन्त्रिणः वक्तव्यम्-

"इयं पहल न केवलं स्वरोजगारं जनयिष्यति, अपितु सीमावर्तिग्रामाणाम् आर्थिकसंरचनाम् अपि सुदृढां करिष्यति। वयं ग्रामीण-अर्थव्यवस्थां, विशेषतः दुर्गमक्षेत्रेषु, बलवतीं कर्तुं कटिबद्धाः स्मः।"

## उत्तराखण्डस्य आदर्शः-

आईजी मनु महाराजः सूचितवान् यत् एतादृशः एव आदर्शः उत्तराखण्डे पूर्वमेव सफलतापूर्वकं प्रवर्तितः अस्ति, यस्य फलम् अतीव उत्साहवर्धकं प्राप्तम्। हिमाचलप्रदेशे अपि एतस्य साफल्यस्य पूर्णविश्वासः अस्ति।

## अन्यविशिष्टाः विषयाः-

मेलने 'सुधारित वितरण क्षेत्र योजना' इत्यस्य अन्तर्गतं सीमाचौकीनां विद्युतीकरणस्य विषये अपि चर्चा अभवत्। एतेन दुर्गमक्षेत्रेषु आधारभूत- संरचनायाः विकासः भविष्यति, सीमाप्रबन्धनं च अधिकं सुदृढं भविष्यति।



# "सामान्यजनेषु मध्यमवर्गे च किमपि भारं न निक्षेप्स्यामः" - मुख्यमन्त्री सुक्खूः अवदत् सर्वकारः स्वीकरिष्यति बृहत्-पदानि"

हिमसंस्कृतवार्ताः - शिमला।

मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः अवदत् यत् हिमाचलस्य बजटे प्रथमवारं तेन राज्यस्य वित्तीयस्थितिः न्यूनीकृत्य जनानां सम्मुखं स्थापिता। आगामि-मासेषु अस्माकं अर्थव्यवस्था गतिं प्राप्स्यति। विधानसभायां बजट-पारित-अनन्तरं पत्रकारैः सह वार्तालापं कुर्वन् मुख्यमन्त्री उक्तवान् यत् वयं नीतिगत-परिवर्तनानि आनीतवन्तः, येन प्रदेशः 'आत्मनिर्भरः' भवितुं शक्नुयात्। सः आश्वासितवान् यत् राज्यसर्वकारः सामान्यजनेषु मध्यमवर्गे (Middle Class) च किमपि आर्थिक-भारं न निक्षेप्स्यति।

येषां वर्गाणां वेतनं स्थगितं (Defer) कृतं, तान् प्रति मुख्यमन्त्रिणा विश्वासः दत्तः यत् यथा एव स्थितिः सम्यक् भवति, तेषां प्रदानं करिष्यते। मङ्गलवासरतः त्रयः-चत्वारि दिनानि यावत् वित्त-सम्बन्धिनां गोष्ठीनां (Finance Meetings) क्रमः आरप्स्यते। राज्यस्य आयं वर्धयितुं ये अपि मार्गाः सन्ति, ते उद्घाटयिष्यन्ते।

## भ्रष्टाचारस्य निरोधः नूतन-जीविकाश्च

मुख्यमन्त्रिणा उक्तं यत्
वयं भ्रष्टाचारस्य मार्गान् पिधानं करिष्यामः।
हिमाचलप्रदेशे नूतन-जीविकायाः द्वाराणि उद्घाट्यन्ते।
'राज्य चयन आयोग' इत्यस्य माध्यमेन निरन्तरं नियुक्तयः प्रचलन्ति।
सोमवासरे एव २००० शिक्षकाणां 'योजना-आधारित' (Scheme Based) रूपेण नियुक्ति-निर्णयः स्वीकृतः। पूर्वं 'पीटीए' (PTA) आधारेण नियुक्तयः भवन्ति स्म, तस्य स्थाने अधुना वयम् एतां नूतनां पद्धतिं प्रयोक्ष्यामः।
शारीरिक-शिक्षा-शिक्षकाणां (PET) नियुक्ति-प्रक्रियायाः गतेः विषये अपि विचारः करिष्यते।
'प्रवेश-शुल्क' (Entry Tax) विषये सः स्पष्टीकृतवान् यत् एतत् ४० वर्षेभ्यः प्रचलति, न तु प्रथमवारम्। लघु-वाहनानां कृते करः अधिकः न वर्धितः।

## ५८,८३० कोटि-रूप्यकाणां बजटं पारितम्

हिमाचल-विधानसभायां सोमवासरे आहत्य ५८,८३० कोटि-रूप्यकाणां बजटं पारितम्। मुख्यमन्त्रिणा २१ मार्च २०२६ दिनाङ्के ५४,९२८ कोटि-रूप्यकाणां बजटं प्रस्तुतम् आसीत्। अन्याः प्राप्तयः (Recoveries) संयोज्य कुल-बजट-राशिः ५८,८३० कोटिः अभवत्। अस्य कृते मुख्यमन्त्रिणा सदने 'विनियोग विधेयकम्' (Appropriation Bill) उपस्थापितं, यत् ध्वनिमतैः पारितं जातम्।

***"अस्माकं लक्ष्यं केवलं बजट-पारितं नास्ति, अपितु प्रत्येकं हिमाचलिनं आर्थिकरूपेण सुदृढं करणं वर्तते।"***

**– सुखविन्दरसिंहसुक्खूः, मुख्यमन्त्री**

# प्रदेशे एलपीजी-कोशः, पेट्रोल-डीजल-इन्धनं च पर्याप्तमात्रया उपलभ्यते

**हिमसंस्कृतवार्ताः- शिमला।**

खाद्य- नागरिक- आपूर्ति- उपभोक्तृ- प्रकरणम् इत्यस्य निदेशिका कुमदसिंह-महोदया अद्य राज्यस्तरीयायाः निरीक्षण-समित्याः (Monitoring Committee) गोष्ठ्याः अध्यक्षतां कुर्वती अवदत् यत् वर्तमानकाले हिमाचलप्रदेशे १९१ गॅस-संस्थाः सन्ति, यासां माध्यमेन उपभोक्तृभ्यः घरेलू- व्यावसायिक- अनिलकोशाः प्रदीयन्ते। सम्प्रति सामान्य- उपभोगस्य तुलनायां ६० प्रतिशतं व्यावसायिक- अनिलकोशाः राज्यं प्राप्नुवन्ति, सर्वाणि व्यावसायिक- प्रतिष्ठानानि च अनिलकोशान् प्राप्नुवन्ति।

## कम्पनीनाम् आश्वासनम् उपलब्धता च

गोष्ठ्याम् उपस्थिताः विविधानां तैलकम्पनीनां प्रतिनिधयः अवदन् यत्- राज्ये घरेलू- एलपीजी-कोशानां पर्याप्ता उपलब्धता अस्ति तथा आवश्यकतानुसारम् आपूर्तिः जायमाना अस्ति।
प्रदेशे पेट्रोल-डीजल इत्यनयोः अपि पर्याप्तं भण्डारणं वर्तते, आगामि-१५ दिनानां कृते 'स्टॉक' उपलभ्यते। एतेषां पेट्रोलियम-पदार्थानाम् आपूर्तिः सुचारुरूपेण प्रचलति।

## ई-केवाईसी (e-KYC) सम्बन्धिताः निर्देशाः

निदेशिका अवदत् यत् राज्यस्य विभिन्नक्षेत्रेभ्यः ई-केवाईसी न जातम् इति कारणतः गैस- संयोजनस्य (Connection) समस्याः आगच्छन्ति।



सा तैलकम्पनीनां प्रतिनिधीन् आदिशत् यत्- अस्यां विकट-परिस्थित्यां कश्चन अपि उपभोक्ता ई-केवाईसी-अभावात् सिलिण्डर- प्राप्त्याः वञ्चितः न भवेत्। अवशिष्टानाम् उपभोक्तृणां ई-केवाईसी प्रक्रिया 'कैम्प-मोड' (Camp Mode) इत्यस्मिन् कारणीया।
गैससंस्थाः मुख्यवितरणकेन्द्रेभ्यः (Focal Points) वितरणस्य द्वयोः दिनयोः पूर्वमेव जनपदनियन्त्रकान्, निरीक्षकान्, पञ्चायत- जनप्रतिनिधीन् च सूचयन्तु, येन समाचारपत्राणां माध्यमेन प्रचारः भवेत्।
वितरणकेन्द्रेषु (Focal Points) एव उपभोक्तृणां ई-केवाईसी सम्पादयितुं निर्देशः दत्तः।

# "उत्तराखण्डे देवभूमौ हरकीपैडीक्षेत्रे प्रथमवारम् आयोजितं संस्कृतकविसम्मेलनम् ऐतिहासिकम्"- राधावल्लभत्रिपाठी




**हिमसंस्कृतवार्ताः- हरिद्वारम्।** उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य प्रबन्धनेन हरकीपैडी- पवित्रक्षेत्रे प्रथमवारम् आयोजिते संस्कृत- कविसम्मेलने देशस्य विभिन्नभागेभ्यः समागताः कवयः रात्रेः दीर्घकालपर्यन्तं स्वकविताभिः श्रोतॄणां मनोरञ्जनं कृतवन्तः।

साहित्य- अकादमी- नवदेहली, उत्तराखण्ड- संस्कृत- विश्वविद्यालयः तथा श्रीगङ्गासभा- हरिद्वारम् एतेषां संयुक्ततत्त्वावधाने सम्पन्नेऽस्मिन् कविसम्मेलने विविधप्रान्तेभ्यः आगताः संस्कृतकवयः मातुः गङ्गायाः स्तुतिपूर्वकं स्वकाव्यानि प्रारब्धवन्तः। जयपुरनगरात् आगता लघुतमा कवयित्री संस्कृति-चतुर्वेदी प्रारम्भिकं काव्यपाठम् अकरोत्।बागपतप्रदेशात् आगतः डॉ. अरविन्दतिवारी तथा देहरादूननगरात् समागतः प्रो. रामविनयसिंहः तयोः काव्येषु वसन्तस्य मनोहरं चित्रणम् आसीत्। अस्य विशिष्टस्य संस्कृतकविसम्मेलनस्य डॉ. शशिकान्ततिवारी "शशिधरः" सम्यक् सञ्चालनं कृतवान्।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य पूर्वकुलपतिः, संस्कृतस्य प्रख्यातः समालोचकः आचार्यः राधावल्लभत्रिपाठी महोदयः स्वमनोगतान् भावान् सद्योरचिताभिनवकाव्येन प्रकटितवान्। तेन उक्तं यत्- "उत्तराखण्डे देवभूमौ हरकीपैडीक्षेत्रे प्रथमवारम् आयोजितम् इदम् अभिनवं, अद्भुतं, संस्कृतकाव्यरसप्रवाहयुक्तं कविसम्मेलनम् ऐतिहासिकम् दृश्यते।"

संपूर्णानन्द- संस्कृत- विश्वविद्यालयस्य पूर्वकुलपतिः, पद्मश्री-समलङ्कृतः त्रिवेणीकविः डॉ. अभिराजराजेन्द्रमिश्रः राष्ट्रभक्तेः, देशे प्रवर्तमानानां विकासकार्याणां च प्रभावपूर्णं वर्णनं स्वकाव्येषु कृतवान्। अपरतः उत्तराखण्ड- संस्कृत- विश्वविद्यालयस्य कुलपतिः प्रो. रमाकान्तपाण्डेयः वसन्तर्तुम् आश्रित्य शृङ्गाररसपूर्णां कवितां श्रावयित्वा श्रोतॄणां हृदयानि रञ्जितवान्।

रात्रेः दीर्घकालपर्यन्तं प्रवृत्तस्य अस्य कविसम्मेलनस्य अध्यक्षतां वहन् तिरुपतिविश्वविद्यालयस्य पूर्वकुलपतिः डॉ. हरेकृष्णशतपथी महोदयः अपि स्वकाव्यपाठेन सर्वान् आह्लादितवान्।सुल्तानपुरप्रदेशात् आगतः कविः अरुणनिषादः 'चैता-गीत'-प्रस्तुत्या विशेषं करताडनं प्राप्तवान्। अन्ये अपि डॉ. सूर्यकान्तत्रिपाठी, डॉ. सुरचनात्रिवेदी, डॉ. युवराजभट्टराई, डॉ. प्रीतिपुजारा, डॉ. पङ्कजझा, डॉ. ऋषिराजपाठकः, डॉ. उमामहेश्वरः, डॉ. भारतभूषणरथः, डॉ. सर्वेशतिवारी, डॉ. प्रकाशचन्द्रपन्तः इत्यादयः कवयः स्वकाव्यैः श्रोतॄन् मोहितवन्तः।कविसम्मेलनं सम्बोधयन् श्रीगङ्गासभा- हरिद्वारस्य अध्यक्षः नितिनगौतमः अवदत् यत्- एषः गङ्गासभायाः कृते प्रथमः अवसरः अस्ति यत्र विश्वविख्याताः संस्कृतकवयः स्वागतं प्राप्नुवन्ति। तेन उक्तं यत्- एतादृशानि आयोजनानि संस्कृतभाषायाः प्रचार-प्रसार-सम्वर्धन-रक्षणार्थं देवभूमौ उत्तराखण्डे, विशेषतः हरिद्वारे, निरन्तरं आयोजनीयानि। अन्ते गङ्गासभाध्यक्षः, कुलपतिः, कुलसचिवः, कोषाध्यक्षः च सर्वान् कवीन् स्मृतिचिह्नैः सम्मानितवन्तः।

कुलसचिवः दिनेशकुमारः कृतज्ञतां ज्ञापयन् अवदत् यत्- विश्वविद्यालये साहित्यिक- क्रियाकलापानां संवर्धनाय सर्वे प्रयत्नाः क्रियन्ते, येन छात्राणां बौद्धिकविकासः सम्यक् भवेत्। सः कार्यक्रमस्य सफलसम्पादनाय सर्वेभ्यः धन्यवादान् अपि प्रकटितवान्।

अस्मिन् अवसरे प्रो. मोहनचन्द्रबलोदी, प्रो. दिनेशचमोला, प्रो. बिन्दुमती द्विवेदी, डॉ. कञ्चनतिवारी, डॉ. दिनेशचन्द्रपाण्डेयः, डॉ. विनयसेठी, डॉ. मीनाक्षीसिंहरावतः, सागरखेमरिया इत्यादयः बहवः विद्वांसः, श्रोतारः, गङ्गाभक्ताः, सामाजिकाः, छात्राः च बहुसंख्यया उपस्थिताः आसन्।

# कुमारभास्करवर्म- संस्कृतपुरातनाध्ययन- विश्वविद्यालये सर्वदर्शनविभागेन 'छात्रदिवसः' सोल्लासं सम्पन्नः



**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, नलबारी, असमः।** असमराज्यस्य ख्यातिलब्धस्य कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालयस्य प्राङ्गणे एकं भव्यं दृश्यं दृष्टम्। विश्वविद्यालयस्य संस्कृत- सर्वदर्शनविभागेन छात्र-कल्याणाय, छात्र- प्रतिभा- प्रोत्साहनाय च 'छात्रदिवसः' इति अतीव उत्साहपूर्वकः कार्यक्रमः आयोजितः। वस्तुतः असमबोडोछात्रपरिषदः अभिभावकस्वरूपस्य बोडोफा इत्युपाधिलब्धस्य उपेन्द्रनाथब्रह्म महोदयस्य जन्मदिवसे सम्पूर्णराज्ये छात्रदिवसः समायोज्यते। अत एव अत्रापि भव्यरूपेण छात्रदिवसस्य आयोजनं जातम्। अस्मिन् कार्यक्रमे न केवलं छात्राणां शैक्षणिक-कौशलं प्रदर्शितम्, अपि तु भारतीयसंस्कृतेः दर्शनपरम्परायाः च सामञ्जस्यम् अपि दृष्टम्।

अस्य कार्यक्रमस्य मुख्यवक्तृत्वेन तथा च मार्गदर्शकरूपेण संस्कृत-सर्वदर्शन-विभागाध्यक्षः आचार्यः रणजीतकुमारतिवारी महोदयः उपस्थित आसीत्। कार्यक्रमस्य आरम्भः आचार्य- तिवारी-महोदयैः सह अन्यैः विद्वद्भिः दीप-प्रज्वालनेन तथा च सरस्वती-वन्दनेन कृतः। आचार्य-तिवारी-महोदयाः स्वकीये ओजस्विनि भाषणे छात्रान् सम्बोधयन् उक्तवन्तः यत्- "छात्रजीवनं तपस्यायाः कालः अस्ति। दर्शनशास्त्रं न केवलं पुस्तकीयं ज्ञानम्, अपि तु जीवनं सम्यक् रूपेण दर्शनस्य कला अस्ति।" तेषां वक्तव्यं श्रुत्वा छात्राणां मनसि नवीन-ऊर्जायाः सञ्चारः जातः। ते महोदयाः छात्रान् निरन्तरं परिश्रमाय, राष्ट्र-हिताय च प्रेरयन्तः छात्रदिवसस्य सार्थकतां स्पष्टीकृतवन्तः। सहैव अस्मिन् अवसरे सर्वेभ्यः प्रेरणां प्रदत्तवती विभागीयाध्यापिका सुश्री लोपामुद्रा गोस्वामी महोदया।

छात्रदिवसस्य अवसरे विभागीयाः छात्राः स्वकीयं कौशलं विविधासु विधासु प्रदर्शितवन्तः। संस्कृतगीतानां, श्लोकोच्चारणस्य च माध्यमेन वातावरणं भक्तिमयं जातम्। तत्र अतीव सुस्वरेण छात्रया सुमीदासेन संस्कृतगीतं श्रावितम्। कार्यक्रमे छात्राणाम् अनुशासनं प्रशंसनीयम् आसीत्। आचार्याणां मतेन एतादृशाः कार्यक्रमाः छात्रेषु आत्मविश्वासं वर्धयन्ति। कार्यक्रमस्य सञ्चालनं कृतवान् शोधछात्रः लिराज काफ्ले। संस्कृत-सर्वदर्शन-विभागस्य अयं प्रयासः विश्वविद्यालयस्तरे बहु प्रशंसितः। आचार्य-रणजीतकुमार-तिवारी-महोदयानां कुशलनिर्देशनेन अयं दिवसः वस्तुतः एकः 'विजय-उत्सवः' इति सिद्धः अभवत्। कार्यक्रमस्य अन्ते विभागस्य पक्षतः सर्वेभ्यः छात्रेभ्यः जलपानं तथा च मिष्टान्नं वितरितम्।

विश्वविद्यालयस्य कुलपतीनां, अन्य-विभागानां च आचार्याणां मतेन एतादृशाः आयोजनाः संस्कृतभाषायाः प्रचाराय, छात्राणां सर्वाङ्गीण- विकासाय, महते लाभाय च भविष्यन्ति।

# देवराई तथा पर्यावरणम् भागः १



वृक्षाणां जीवित्वम् अस्ति इति प्रथमं वैज्ञानिकः डॉ. जगदीशचन्द्रबसुः सिद्धवान्। वृक्षाः श्वासं गृह्णन्ति, श्वासं मुञ्चन्ति च- एतत् सर्वे जानन्ति; परन्तु वृक्षाणामपि भावनाः सन्ति, तेषां पित्त- कफ- वातादीनां दोषाणां बाधा भवति, किञ्चित् तेषां रोचते, किञ्चित् न रोचते, तेषां स्वकीया रुचयः अरुचयश्च सन्ति, ते चिन्तयन्ति, स्वानुभवान् व्यक्तयन्ति, परस्परं संवादं कुर्वन्ति, मनुष्यैः सहापि कथयन्ति इति श्रुत्वा आश्चर्यं जायते। अपि च, एते वृक्षाः भूमौ रोपणात् पूर्वं संस्कारान् प्राप्नुवन्ति, शिक्षां लभन्ते, तत् सर्वं ते अधीयते इति आश्चर्यकरम्।

ओ३म् स्वामी साधना केन्द्रस्य, श्रीवर्धनस्य च संस्थापकः दीपक जोशी (काका जोशी इति लोके प्रसिद्धः) एतस्य सर्वस्य स्वानुभवं प्राप्तवान्, सः चान्येभ्यः अपि अनुभवितुम् अवसरं दत्तवान्। सः ऋषितुल्यः व्यक्तिः अस्ति। वृक्षविषये तस्य गाढः अभ्यासः, महत्त्वपूर्णानि निरीक्षणानि च सन्ति, यानि चत्वारिंशद्वर्षपर्यन्तं तस्य परिश्रमेण सिद्धानि।

पुण्यां स्थितया "स्टेट बँक्क पेन्शनर्स" इत्यस्य सामाजिकसंस्थया अस्मिन् विषये वक्तुं तं आमन्त्रितवन्तः। अस्माकं संस्था लोकानां ज्ञानवृद्ध्यर्थं, ज्येष्ठजनानां मार्गदर्शनार्थं, विविधविषयेषु तज्ज्ञानिनः आमन्त्रयति। प्रतिमासं द्वितीयमङ्गलवासरे "सावरकर सभागृहं", डेक्कन, पुणे इत्यत्र अयं कार्यक्रमः क्रियते। तदनुसारं २५ मार्च २०२६ तिथौ "देवराई तथा पर्यावरणम्" इत्यस्मिन् विषये सः आगतः। तेन एषः विषयः अत्यन्तं रोचकतया निरूपितः, येन सर्वेषां श्रोतॄणां मनसि तस्य देवरायां गत्वा तेन उक्तान् अनुभवान् स्वयमेव अनुभवितुं तीव्रा इच्छा जाता। तेन श्रीवर्धनस्य समीपे देवराई स्थापिता, यत्र त्रिसहस्राधिकाः वृक्षाः सन्ति। ते सर्वे वृक्षाः 'सुशिक्षिताः' इव सन्ति। रोपणात् पूर्वं प्रत्येकस्य वृक्षस्य षट् घण्टानां संस्कारः क्रियते, एकविंशतिदिनपर्यन्तं तेषां 'विद्यालयः' भवति। प्रातःकाले द्वौ घण्टौ, सायंकाले द्वौ घण्टौ एवं तेषां शिक्षणं भवति। प्रातःकाले तेषां नाम, अस्तित्वस्य प्रयोजनं, उपयोगाः, मूल- पत्र- फल- त्वक्- प्रयोजनानि, "भवन्तः किमर्थम् अत्र आगताः?" इत्यादयः विषयाः शिक्ष्यन्ते। गायत्रीमन्त्रः, पुरुषसूक्तम्, धन्वन्तरिमन्त्रः इत्यादीनां संस्काराः अपि क्रियन्ते। सायंकाले अपि शिक्षणं भवति। अनन्तरं ते वृक्षाः स्वयमेव तादृशं व्यवहारं कुर्वन्ति, ततो भूमौ रोप्यन्ते।

सामान्यजनानां दृष्टिकोणः तथा जोशी-महाशयस्य दृष्टिकोणः भिन्नः अस्ति। अस्माकं दृष्ट्या वृक्षाः केवलं वृक्षाः; परन्तु ते निष्कामभावेन फलानि, पुष्पाणि, पत्राणि, त्वचः च दत्वा मानवजीवनं धारयन्ति। ते प्राणवायुः उत्पादयन्ति, वायुम् शुद्धीकुर्वन्ति, वातावरणं स्वास्थ्यकरं कुर्वन्ति। किञ्च ते किञ्चित् अपि प्रत्युपकारं न अपेक्षन्ते।

देवराई इति प्रकारः सर्वैः स्थापनीयः, पोषनीयश्च। प्राचीनकाले भारते ग्रामे ग्रामे देवरायः आसन्, परन्तु अद्य ताः लुप्तप्रायाः। देवराई अत्यन्तं पर्यावरणहितकारी वनम् अस्ति, या पर्यावरणस्य क्षयम् निवारयति। जोशी-महाशयः भारतं पञ्च-षड्वारं पर्यटितवान्, कस्य वृक्षस्य स्थानं कुत्र इति सः सुगमतया वदति। सः २००३ तमे वर्षे प्रथमं "नक्षत्रवनम्" स्थापितवान्। तस्य उद्घाटनं महाराष्ट्रस्य भूतपूर्वमुख्यमन्त्री मनोहरजोशी-महाशयेन कृतम्। देवराई नाम औषधिगुणयुक्तानां वृक्षाणां वनम्। प्राचीनकाले ग्रामेषु औषधोपचारार्थं एतानि वनानि निर्मितानि। देवमन्दिरस्य समीपे स्थापनेन "देवराई" इति नाम प्राप्तम्। आयुर्वेदे ज्ञातानां वनस्पतीनाम् उपयोगेन रोगोपचारः क्रियते स्म। देवरायां वृक्षच्छेदनं न क्रियते स्म। तत्र पिप्पलः, वटः, निम्बः, आमलकः, हरितकी, बिभीतकः, शङ्खपुष्पी, सोनामुखी इत्यादयः बहवः वृक्षाः रोप्यन्ते स्म। अर्जुनवृक्षस्य त्वक् हृदयरोगे औषधरूपेण प्रसिद्धा। एतादृशैः वनैः वायुः शुद्धः भवति, स्वास्थ्यलाभः अपि भवति।

जोशी-महाशयः वदति- वृक्षाणामपि स्वभावाः सन्ति। ते अपि वात-पित्त-कफदोषैः पीड्यन्ते। ते परस्परं सहकार्यं कुर्वन्ति, न जातिभेदं कुर्वन्ति। तस्य देवरायां वटः, पिप्पलः, निम्बः, कवठः, मञ्जिष्ठा, मोहः, राळा, दन्ती इत्यादयः सहस्राधिकाः वृक्षाः सन्ति।

किञ्च, तेषां मते प्रत्येकस्य वृक्षस्य स्वीयं सङ्गीतरुचिः अस्ति। यत् तस्मै रोचते, तत् सः ग्राहयति। बकुलवृक्षस्य उदाहरणेन सः वदति- एकदा वादकः तस्य समीपे माउथ्-ऑर्गन् वादितवान्, तदा वृक्षः आनन्देन दोलायमानः अभवत्। एतत् दृश्यं तेन सञ्चितम्। एवं सहस्राधिकाः प्रयोगाः तेन कृताः। केचन छात्राः अस्मिन् विषये अनुसन्धानं कृत्वा पीएच.डी. पदवीं अपि प्राप्तवन्तः। अन्ते सः आवाहनं करोति "एकवारम् आगच्छन्तु, अस्माकं देवराईं पश्यन्तु, वृक्षैः सह संवादं अनुभवन्तु। मानवाः कदाचित् मिथ्यावादिनः भवन्ति, परन्तु वृक्षाः न।

संकलितम्/ अनुदितम्
सुधा साठये, मुंबई।

# "लौकिकन्यायकोशः"
# "कोषपानन्यायः"

पुरा कस्यचन अपराधस्य दण्डरूपेण किंवा अपराधिनः परीक्षार्थं विषप्राशनं भवति स्म। तदा संदिग्धेन अपराधिना अपि विषं प्राश्यते स्म इति अनेन न्यायेन बोध्यते। विषप्राशनस्य दिव्यमिति नाम।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

# वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। श्रुतं वा त्वया? पाश्चात्यदेशे एकया नवषष्टि- वर्षीयया वृद्धया विपुलं धनं जितम् अस्ति।तया बहु-वर्षाणि यावत् समानाः अङ्काः एव भाग्य- क्रीडायां प्रयुक्ताः। तेन धनेन तस्याः पतिः सम्प्रति विश्रामं प्राप्तुं शक्नोति।

काव्या- अहो, तस्याः धैर्यं प्रशंसनीयम् एव। तया महत् फलं लब्धम्। मया अन्या एका वार्ता पठिता। अस्माकं देशे एकेन विंशति-वर्षीयेन युवकेन एकाकिना एव नदी स्वच्छीकृता। तस्य मित्रैः कार्यं त्यक्तम्, तथापि तेन तत् दुष्करं कार्यं पूर्णं कृतम्। तस्य प्रयासं दृष्ट्वा 'आनन्द'-नाम्ना प्रसिद्ध-उद्योगपतिना अपि सः युवकः भृशं प्रशंसितः।

नन्दिनी- सत्यम्, तस्य युवकस्य निष्ठा अतीव उत्तमा। तेन प्रकृतेः महती सेवा कृता। परन्तु चीनदेशे अन्या एव एका विचित्रा घटना दृष्टा। तत्र एकया महिलया स्व-श्वानाय 'श्वान- विद्यालये' प्रभूतं धनं व्ययितम्। सा स्व-कार्ये अतीव व्यग्रा अस्ति, अतः श्वानस्य रक्षणाय तया एषः मार्गः चिन्तितः।

काव्या- हा हा! श्वानाय अपि विद्यालयः! नगरेषु जनैः पशवः अपि अपत्यानि इव पालिताः सन्ति। अस्तु, चीनदेशस्य एव अन्या एका भावपूर्णा वार्ता मया श्रुता। तत्र एकया मात्रा विंशति-वर्षाणि यावत् सैनिकेभ्यः पादत्राण-कूर्चाः निर्मिताः। तस्याः सैनिकपुत्रः पुरा वीर-गतिं प्राप्तवान् अस्ति। तं मृतं पुत्रं स्मृत्वा तया अन्येभ्यः सैनिकेभ्यः एतादृशः स्नेहः दर्शितः।

नन्दिनी- अहो, तस्याः मातुः वात्सल्यं असीमम्। तया पुत्र-शोकः अपि सेवायां परिवर्तितः अस्ति। अद्यतनस्य एतावत् एव। धन्यवादाः।

# साधना-सप्ताहस्य आयोजनम्:
# मिशन-कर्मयोगिनः सुदृढीकरणम्

कार्मिक-प्रशिक्षण-विभागः, क्षमता-निर्माण-आयोगः, 'कर्मयोगी भारत' च मिलित्वा एप्रिल-मासस्य द्वितीये दिनाङ्के नवदिल्ल्यां 'साधना-सप्ताहस्य' आयोजनं करिष्यन्ति।क्षमता-निर्माण-आयोगस्य सदस्या डा. अलका मित्तल अवदत् यत् २०२० तमे वर्षे आरब्धस्य 'मिशन-कर्मयोगी' इत्यस्य मुख्योद्देश्यं देशस्य सर्वेषां सर्वकारीय-कर्मचारिणां क्षमतायां, कार्यप्रदर्शने, दक्षतायां च सुधारः तथा च नागरिक-केन्द्रित-सुशासनस्य कल्पनया सह भविष्यस्य रूपरेखायाः निर्माणं वर्तते।डा. मित्तल महोदया सूचितवती यत् एषा पहलः अधिकारिणां निरन्तर-शिक्षणे योग्यता-विकास-प्रक्रियायां च ध्यानं केन्द्रितं कृत्वा सुशासन-प्रणाल्यां परिवर्तनं आनेतुं लक्षयति। सा अपि उक्तवती यत् सर्वकारीय-कर्मचारिणां कृते व्यापकमैदानिक-शिक्षण-मञ्चरूपेण (Digital learning platform) 'आई.जी.ओ.टी. (iGOT) कर्मयोगी' अस्मिन् परिवर्तने महतीं भूमिकां निर्वहति।

